दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-233 | 1 | जून 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णावस्या
आषाढः 01 प्रविष्ठांशः मङ्गलमयः भवेत्

2 "सिविलाइजेशनल ए. आई." इति विषयकायाः एकविंशतिदिवसीय-ग्रीष्मकालीन-कार्यशालायाः शुभारम्भः

3 शिमलायां विद्यालयसञ्चालिकायाः हत्याया जनेषु भयवातावरणं, महिला हरियाणा-राज्यनिवासिनी आसीत्, मुखावरणधारी आक्रमणकारी अद्यापि पलायितः

5 Fifa world Cup- मोरक्को-ब्राजील देशयोः क्रीडाद्वन्द्वं समेन (ड्रॉ) समाप्तम्, स्कॉटलैंड-कतर देशौ विजयी-सफलौ च

# प्रधानमन्त्री नरेन्द्रमोदीः फ्रान्सदेशस्य राष्ट्रपतिना इमैनुअल मैक्रोनेन सह नीस्-नगरे प्रतिनिधिमण्डलस्तरीयां वार्ता कृतवान्



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी, फ्रान्स्-देशस्य राष्ट्रपतिः इमैनुएल मैक्रो च गतदिने नीस-नगरस्य पालेस्-दे-एक्स्पोशिन्स् इत्यत्र भारत-इनोवेट्स इति कार्यक्रमस्य संयुक्तरूपेण उद्घाटनम् अकुरुताम्। सः प्रतिनिधिमण्डलस्तरीयां वार्तां कृतवान्। भारत-फ्रान्स्-नवान्वेषणवर्षान्तर्गतं आयोजितः अयं प्रमुखः कार्यक्रमः, उभयोः देशयोः शीर्ष-नवान्वेषण-आरम्भान्, वेञ्चर-कैपिटलप्रति-निधित्वं इत्येतञ्च समाकलयति। कार्यक्रमेऽस्मिन् उन्नत-गणनम्, सेमिकण्डक, कृत्रिम बुद्धिमत्ता, क्वाण्टम्-प्रौद्योगिकी, अन्तरिक्ष-प्रौद्योगिकी, स्वच्छ-ऊर्जा,प्रौद्योगिकीत्यादिषु त्रयोदश प्रमुखेषु क्षेत्रेषु नवान्वेषणानि सन्ति। अस्मिन् अवसरे प्रधानमन्त्रिणा मोदीवर्येण भारत - फ्रान्स्-देशयोः सम्बन्धस्य बलविषये अवधानं दत्तम्। सः अवदत् यत्, यद्यपि बहवः देशाः व्यापारे सामरिकसहयोगे च निमग्नाः सन्ति, तथापि केवलं कतिपयाः सम्बन्धाः एव समानदृष्ट्या समानहितैः च मार्गदर्शिताः भवन्ति। सः भारत-फ्रान्स्-सहभागित्वम् एतादृशम् एकम् चिरस्थायी सम्बन्धम् अस्ति यस्य मूलाधारः परस्परविश्वासः, सहभागीमूल्यानि, भविष्यत्कालाय सामान्यदृष्टिः च वर्णितवान्। सः अवदत् यत्, नवान्वेषणम्, प्रौद्योगिकी, भारतस्य यूनां आकांक्षाः देशस्य परिवर्तनस्य, भविष्यनिर्माणस्य च चालकभूताः सन्ति।सभाम् अभिसंबोधयन् फ्रान्स्-देशस्य राष्ट्रपतिः मैक्रो-वर्यः, भारतात् बहिः अस्य उपक्रमस्य प्रथमसंस्करणस्य आतिथेयत्वं फ्रान्स्-देशाय सम्मानः अस्तीति अवोचत्। सः वैश्विक नवोन्मेषशक्तिरूपेण भारतस्य उदयस्य प्रशंसां कृतवान्। सः अवदत् यत् गतदिने प्रश्नः नास्ति यत् भारतम् नवोन्मेषं करोति वा न वा, अपितु प्रश्नः अयम् अस्ति यत् भारतेन सह नवोन्मेषकार्ये कः सहभागी भविष्यति। अस्य वर्षस्य आरम्भे मुम्बई-नगरे प्रारब्धस्य भारत-फ्रान्स्-नवान्वेषणवर्षस्य उल्लेखं कुर्वन्, श्रीमैक्रोंवर्यः अवदत् यत्, भारतस्य प्रमुखाणां नवोद्योग-संस्थानां नवान्वेषकाणां च प्रदर्शनार्थं, निवेशकैः, उद्यमपतिभिः, सह सहयोगं प्रवर्धयितुं सहभागी-देशत्वेन चितः इति फ्रान्स्-देशः गौरवान्वितः अस्ति इति।अस्मिन् अवसरे विदेश-कार्यमन्त्री डा. एस्. अशङ्करः, वाणिज्योद्योग मन्त्री पीयूष गोयलः, राष्ट्रिय सुरक्षा-परामर्शकः डोभालः, प्रधान-वैज्ञानिक परामर्शकः अग्रकुमारसूदः, इन्फोसिस् संस्थापकः नारायणमूर्तिः, अनेके व्यापार-प्रमुखाः च उपस्थिताः आसन्। दिनानन्तरं, प्रधानमन्त्री मोदी राष्ट्रपतिः मैक्रों च भारत-क्लान्स् विशेष-वैश्विक सामरिक सहभागित्वस्य प्रगतिं समीक्षितुं, प्रमुख-क्षेत्रीय-वैश्विक-विषयान् चर्चयितुञ्च वार्तालापं करिष्यतः।

## सुभाषितम्

**आपत्सु मित्रं जानीयाद्**
**युद्धे शूरमृणे शुचिम्।**
**भार्यां क्षीणेषु वित्तेषु,**
**व्यसनेषु च बान्धवान्॥**
**(हितोपदेश, मित्रलाभ- ७२)**

अर्थात्- आपत्ति में मित्र, युद्ध में शूर, ऋण में सच्चा व्यवहार, निर्धनता में स्त्री और दुःख में भाई बन्धुओं की पहचान होती है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## नरेन्द्र मोदिना विकसित-भारतस्य लक्ष्यं प्रति देशः अग्रे सारितः- केन्द्रीय-श्रम-आजिविका-राज्यमन्त्री



केन्द्रीय-श्रम-आजिविका-राज्यमन्त्री शोभा करन्दला वर्या अवदत् यत् प्रधानमन्त्रिणा नरेन्द्र मोदिना विकसित-भारतस्य लक्ष्यं प्रति देशः अग्रे सारितः। आन्ध्रप्रदेशस्य तिरुमला-श्री-वेङ्क और मन्दिरे दर्शनानन्तरं सा अवदत् यत् एषा यात्रा प्रधानमन्त्रिणः नरेन्द्र-मोदिनः द्वादश-वर्षीय-कार्यकालपूर्णतायाः तथा च देशस्य दीर्घकालं निरन्तरं सेवमानस्य प्रधानमन्त्रिणः स्मरणार्थं कृता अस्ति

## लाडली-बहना इति योजायाः सप्तत्रिंशत्तम-सहयोगांशस्य वितरणं कृतवान् मध्यप्रदेशस्य मुख्यमन्त्री



मध्यप्रदेशस्य मुख्यमन्त्री मोहन यादवः गतदिने सागर-मण्डले राज्य-स्तरीय कार्यक्रमे लाडली-बहना इति योजायाः सप्तत्रिंशत्तम-सहयोगांशस्य वितरणं कृतवान्। सम्पूर्ण राज्ये सपादैक को युधिकानां महिला-लाभार्थिनां वित्त-कोषेषु प्रत्यक्षतया पंचत्रिंशत्-अधिक-अष्टादशशत-कोऽधिक-रूप्यकाणि प्रेषितानि।

## आयुष्-मन्त्रालयेन गतदिने नूतनः गिनीज बुक ऑफ वर्ल्ड रिकॉर्ड इति-विश्व-अभिलेखः निर्मितः

आयुष्-मन्त्रालयेन गतदिने नूतनः गिनीज बुक ऑफ वर्ल्ड रिकॉर्ड इति-विश्व-अभिलेखः निर्मितः। यूट्यूब लाईव स्ट्रीम अर्थात् प्रत्यक्ष-प्रसारित-योग-सत्रे सर्वाधिक दर्शकाणां सहभागितायै आयुष्-मन्त्रालयेन, मोरा-देसाई-राष्ट्रीय-योग-संस्थानस्य हाब्विल्ड-संस्थायाश्च सहयोगेन गतदिने अन्तार्राष्ट्रीय-योग-दिवसस्य षड्विंशति-उत्तरद्विसहस्रतम वर्षस्य उत्सवानां भागरूपेण वैश्विकम् आन्लाइन- आभासीयं योग-सत्रम् आयोजिम्। अस्मिन् वैश्विके आन्लाइन-योग-सत्रे आयुष्-मन्त्रालयः पञ्चत्रिंशत्सहस्राधिकचतुर्लक्षाणां सत्यापित-दर्शकाणाम् अभिलेखं स्थापितवान् । ऐतिहासिक उपलब्धेः योगदानाय सम्पूर्ण विश्वे नागरिकान् अभिनन्दन् आयुष्-मन्त्री प्रतापराव धव-वर्यः अवदत् यत् नूतनः गिनी विश्व-अभिलेखः योगस्य वन-पद्धत्याः रूपेण वर्धमानां वैश्विक स्वीकार्यतां प्रतिबिम्बयति ।

## विश्व-रक्तदातृ-दिवसस्य अवसरे स्वैच्छिक रक्तदानाय आह्वानं कृतवान् स्वास्थ्यमन्त्री

केन्द्रीय-स्वास्थ्यमन्त्री जगत्-प्रकाश-नड्डा विश्व-रक्तदातृ-दिवसस्य अवसरे स्वैच्छिक रक्तदानाय आह्वानं कृतवान्। सामाजिक-अन्तलमाध्यमेन प्रसारिते-सन्देशे तेन उक्तं यत् रक्तदानं कस्यचित् व्यक्तेः वन रक्षणस्य तथा नूतन-वन-प्रदानस्य सर्वाधिकं प्रभावि पावनं च माध्यमम् अस्ति।

## कर्नाटके वित्तमन्त्री अवदत् यत् कर-विभाजस्य माध्यमेन राज्याय चतुर्लक्ष-कोटिरूप्यकाणि प्राप्तानि


केन्द्रीय-वित्तमन्त्री निर्मला सीतारमणः गतदिने बेङ्गलूरु-नगरे विकसित भारत-सङ्कल्प-समावेशं सम्बोधयन्ती अवदत् यत् कर्नाटक-राज्यं यू.पी.ए. शासनकालस्य अपेक्षया पञ्चगुणितम् अधिकं केन्द्रीय-कर-विभाजिम् अवाप्तवत्। वित्तमन्त्री अवदत् यत् कर-विभाजस्य माध्यमेन राज्याय चतुर्लक्ष-कोटिरूप्यकाणि प्राप्तानि । राष्ट्रीय-रामार्ग निर्माणाय, रेल्-संरचना-विकासाय, बेङ्गलूरु-चेन्नई औद्योगिक-संपथ-परियोजनायै, पुनर्नवीकरणीय परियोजनायै केन्द्रीय सहायता प्रदत्ता इति तया उक्तम्।

# केन्द्रीय- संस्कृत- विश्वविद्यालयस्य इम्मवर्स इन्नोवेशन्स संस्थायाश्च संयुक्ततत्त्वावधानेन "सिविलाइजेशनल ए. आई." इति विषयकायाः एकविंशतिदिवसीय- ग्रीष्मकालीन- कार्यशालायाः शुभारम्भः




**हिमसंस्कृतवार्ताः-नागपुरम्।**
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली, इम्मवर्स इन्नोवेशन्स प्राइवेट लिमिटेड, नागपुरम् इत्येतयोः संयुक्ततत्त्वावधानेन "Building Civilizational AI from Bharat" इति विषयकस्य ग्रीष्मकालीन- प्रशिक्षण- शिविरस्य शुभारम्भः १५ जून् २०२६ तमे दिने महाराष्ट्रराज्यस्य नागपुरनगरे भविष्यति। एषा कार्यशाला १५ जूनतः ५ जुलाई २०२६ पर्यन्तम् आयोजिता भविष्यति।ग्रीष्मकालीन-कार्यशालायाः समन्वयकः तथा निदेशकः (केन्द्रीय-योजनाः) प्रो. मधुकेश्वरभट्टः सूचितवान् यत् अस्याः कार्यशालायाः उद्देश्यं भारतीयज्ञानपरम्परायाः, संस्कृतभाषायाः, आधुनिक- कृत्रिमबुद्धिमत्तायाः समन्वयेन च भारतकेन्द्रितस्य Civilizational AI इत्यस्य विकासदिशि युवजनान्, शोधार्थिनः, अध्यापकान् च प्रशिक्षयितुम् अस्ति। कार्यशालायां भारतीयज्ञानप्रणाली, संस्कृतग्रन्थानां डिजिटलीकरणं, भाषाप्रौद्योगिकी, यन्त्राध्ययनम् (Machine Learning) तथा कृत्रिमबुद्धिमत्ता- आधारित-नवोन्मेषविषयेषु विशेषज्ञैः व्याख्यानानि, प्रशिक्षणसत्राणि, समूहचर्चाः, परियोजनाधारित- क्रियाकलापाः च आयोज्यन्ते। डॉ. अमृताकौर्या उक्तं यत् उद्घाटनसमारोहे मुख्यातिथिरूपेण कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य, रामटेकस्थितस्य, पूर्वकुलपतिः प्रो. पङ्कजचांदे महोदयः उपस्थितः भविष्यति। कार्यक्रमस्य अध्यक्षतां केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडी महोदयः करिष्यति। इम्मवर्स इन्नोवेशन्स प्राइवेट लिमिटेड संस्थायाः संस्थापकः, मुख्यकार्यकारी- अधिकारी आर. रामकृष्णन् तथा सह- संस्थापिका प्रीति रामकृष्णन् विशिष्टातिथिरूपेण उपस्थितौ भविष्यतः। ग्रीष्मकालीन-कार्यशालायाः स्थानीयसमन्वयकः अनुरागश्रीवास्तवः अवदत् यत् अस्यां कार्यशालायां देशस्य विविधप्रदेशेभ्यः चयनिताः ३० छात्राः छात्राश्च सहभागित्वं करिष्यन्ति। प्रतिभागिनां चयनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नपरिसरेभ्यः, देशस्य प्रतिष्ठित- उच्चशिक्षणसंस्थाभ्यः कृतम् अस्ति। एतेषु सीताराम- आदर्श- संस्कृत- महाविद्यालयः, कोलकाता; दीनदयाल-उपाध्याय-विश्वविद्यालयः, गोरखपुरम्; हिन्दू-कॉलेजः, दिल्ली- विश्वविद्यालयः; जैन- विश्वभारती- डीम्ड- टू- बी- विश्वविद्यालयः, लाडनूं (राजस्थानम्); जवाहरलाल नेहरू विश्वविद्यालयः, नवदेहली; एम. जे. कॉलेजः, जलगाँव; महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालयः उज्जयिनी; नव-नालन्दा-महाविहारः (डीम्ड-विश्वविद्यालयः), नालन्दा; पुडुचेरी विश्वविद्यालयः संबलपुरम्; सावित्रीबाई फुले विश्वविद्यालयः पुणे, संपूर्णानंद संस्कृत विश्वविद्यालयः; द यूनिवर्सिटी ऑफ बर्दवानः दिल्ली विश्वविद्यालयः चेत्यादीनां विद्यार्थिनः समाविष्टाः सन्ति।
सह-समन्वयकः डा. योगेन्द्रदीक्षितः अवदत् यत् वर्तमानकाले कृत्रिमबुद्धिमत्ता वैश्विकपरिवर्तनस्य प्रमुखाधारः जाता अस्ति। एतादृशे समये भारतस्य प्राचीनज्ञानपरम्परा, संस्कृतसाहित्यं, दार्शनिकचिन्तनं, सांस्कृतिकधरोहरं आधुनिक- प्रौद्योगिक- नवोन्मेषैः च सह संयोज्य विश्वाय मूल्याधारितं, मानवकेन्द्रितं, सांस्कृतिकरूपेण समृद्धं च कृत्रिमबुद्धिमत्ता-मॉडल प्रदातुं शक्यते। एषा कार्यशाला तस्यैव दिशि महत्त्वपूर्णा दूरदर्शिनी च प्रयासः अस्ति। तेन अपि उक्तं यत् कार्यशालाकाले प्रतिभागिभ्यः भारतीय- ज्ञान- प्रणाली, संस्कृताधारित- दत्तांश- संसाधनम् (Data Resources), भाषाप्रौद्योगिकी, ज्ञाननिरूपणम् (Knowledge Representation), यन्त्राध्ययनम् (Machine Learning) तथा Civilizational AI इत्यस्य विविधेषु आयामेषु विशेषज्ञाणां मार्गदर्शने प्रशिक्षणं प्रदास्यते।आयोजकैः विश्वासः व्यक्तः यत् एषः प्रयासः भारतीयज्ञानपरम्परायाः, उद्भवमानायाः कृत्रिमबुद्धिमत्ता- प्रौद्योगिक्याः समन्वयाय नूतनां दिशं प्रदास्यति। अस्मिन् क्षेत्रे नवोन्मेषस्य अनुसन्धानस्य च नूतनावसरान् सृक्ष्यति।

# रकछम- छितकुल- वन्यजीवाभयारण्यक्षेत्रे पर्यटकैः शुल्कं देयं भविष्यति, द्वयोः स्थलयोः अवरोधकद्वाराणि स्थाप्यन्ते



हिमसंस्कृतवार्ताः- शिमला।प्रदेशस्य रकछम- छितकुल-वन्यजीवाभयारण्यक्षेत्रे आगच्छन्तः देशीयाः विदेशीयाश्च पर्यटकाः भविष्ये शुल्कं दास्यन्ति। इको- टूरिज्म-सोसायटी इत्यस्याः कार्यकारिणी- समितेः प्रथमोपवेशने इको- पर्यटन- शुल्कग्रहणस्य निर्णयः कृतः। तथा च समित्या द्वयोः स्थलयोः अवरोधकद्वारयोः (बैरियर) स्थापनसम्बद्धे प्रस्तावेऽपि सदस्यैः स्वीकृतिः प्रदत्ता। शुल्करूपेण प्राप्ता राशि विभिन्नक्रियाकलापेषु व्ययीक्रियिष्यते।
ज्ञायते यत् रकछम-छितकुल-वन्यजीवाभयारण्ये पर्यटनस्य प्रोत्साहनार्थम् इको-टूरिज्म-सोसायटी इत्यस्याः कार्यकारिणी-समितेः प्रथमोपवेशनम् अभवत्। रकछमे सम्पन्नायां अस्यां सभायां अभयारण्यप्रदेशे आगच्छद्भ्यः पर्यटकेभ्यः इको- पर्यटन- शुल्कग्रहणस्य निर्णयः कृतः। अस्य कृते प्रवेशबिन्दुषु रकछम-छितकुले बटसेर्यां च अवरोधकद्वारस्थापनस्य प्रस्तावः प्रस्तुतः। सभायां सर्वे सदस्याः अस्मिन् विषये स्वसहमतिं प्रदर्शितवन्तः। सराहन- क्षेत्रस्य वन्यजीवोप- अरण्यपालः अशोककुमार नेगी महोदयः अवदत् यत् इको- टूरिज्म- सोसायटीतः प्राप्ता राशिः, शुल्कं क्षेत्रस्य स्वच्छतायै, पर्यटकसुविधानां विकासाय, पर्यावरणसंरक्षणाय, स्थानीयस्तरे इको- पर्यटनगतिविधीनां सुदृढीकरणाय उपयुज्यते। अस्यां सभायां सांगला-उपत्यकायाः छितकुल, रकछम, बटसेरी-ग्रामपञ्चायतानां नवनिर्वाचिताः जनप्रतिनिधयः, युवक-महिलामण्डलानां सदस्याः, ग्रामवासिनः च सहभागिनोऽभवन्। अशोककुमार नेगी महोदयेन उक्तं यत् सभायां रकछम- छितकुल- वन्यजीवाभयारण्यस्य प्राकृतिक- जैविकमहत्त्वस्य विषये विस्तरेण चर्चा अभवत्। तेन उक्तं यत् एषः प्रदेशः स्वकीयया विशिष्टया जैवविविधतया, प्राकृतिकसौन्दर्येण, वन्यजीवसम्पदा प्रदेशे विशेषपरिचयं धारयति। अतः पर्यटनस्य वर्धमानप्रभावस्य मध्ये प्रकृतेः पर्यावरणस्य च संरक्षणं प्राधान्येन करणीयम् इति कालस्य आवश्यकता वर्तते। स्थानीयसमुदायस्य सहभागितया इको-पर्यटन-सोसायटी इत्यस्य सङ्घटनं सञ्चालनं च विषये विस्तृतविमर्शः कृतः। अस्याः सभायाः उद्देश्यं क्षेत्रे उत्तरदायिपर्यटनस्य प्रोत्साहनं, पर्यावरणसंरक्षणस्य सुनिश्चितीकरणं तथा पर्यटनात् प्राप्तलाभानां स्थानीयसमुदायेन क्षेत्रविकासेन च संयोजनं भविष्यति। अस्मिन् अवसरे स्थानीयपञ्चायताः, वन्यजीवविभागः तथा स्थानीयसमुदायः मिलित्वा सांगला-उपत्यकायाः प्राकृतिकधरोहरं संरक्ष्य आगामिसन्ततीनां कृते आदर्शं सततं च पर्यटनप्रतिमानं विकसितुं संकल्पं कृतवन्तः।

# ५२तमं जी-७ शिखरसम्मेलनम् अद्य आरभ्यते; भारतं १३तमवारं
## सहयोगी-देशरूपेण भविष्यति सम्मिलितम्

५२तमं जी-७ शिखरसम्मेलनम् अद्य आरभ्य फ्रांस-देशस्य 'एवियान' नगरे आरभ्यते। त्रिविधदिवसीय- अस्मिन् सम्मेलने जी-७ सङ्घस्य सदस्यदेशाः- फ्रांस, अमेरिका, ब्रिटेन, कनाडा, जर्मनी, इटली, जापान च भागं ग्रहीष्यन्ति। यूरोपीयसङ्घस्य यूरोपीय-आयोगस्य च अध्यक्षाः अपि अस्मिन् सम्मेलने सम्मिलिताः भवन्ति। एतदतिरिक्तं फ्रांस-देशेन भारत, ब्राजील, मिस्र, केन्या, दक्षिण कोरिया, कतर, साउदी अरब, सीरिया, यूक्रेन तथा च संयुक्त अरब अमीरात (UAE) एते देशाः 'संपर्क-साझेदार' (Outreach Partners) रूपेण आमन्त्रिताः सन्ति।
**भारतस्य भूमिका महत्त्वं च-:** १३तमवारं सहभागिताः भारतं १३तमवारं अस्मिन् सम्मेलने साझेदार-देशरूपेण सम्मिलितं भविष्यति। प्रधानमन्त्री नरेन्द्र मोदी श्वः संपर्क-सत्रे (Outreach Session) भागं ग्रहीष्यति।
**वैश्विकं महत्त्वम्-:** जी-७ शिखरसम्मेलने तस्य (प्रधानमन्त्रिणः) सहभागिता वैश्विक-भूराजनीतौ भारतस्य महत्त्वपूर्णां भूमिकां रेखाङ्कितां करोति। भारतं प्रमुखा आर्थिक-महाशक्तिः, विश्वस्य कृते कूटनीतिक-सेतुः तथा च हिन्द-प्रशान्तक्षेत्रे रणनीतिक-सहयोगी रूपेण जी-७ सङ्घस्य कृते महत्त्वपूर्णं वर्तते।
**हितरक्षा प्रौद्योगिक्याः लाभः च-:** अस्मिन् शिखरसम्मेलने सहभागितया भारतम् अल्पविकसितानां विकासशीलानां च देशानां हितरक्षायै प्रतिनिधित्वं कर्तुं शक्ष्यति।

# शिमलायां विद्यालयसञ्चालिकायाः हत्यया जनेषु भयवातावरणं, महिला हरियाणा- राज्यनिवासिनी आसीत्, मुखावरणधारी आक्रमणकारी अद्यापि पलायितः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य राजधानी शिमलानगरस्य संजौली क्षेत्रे शनिवासरे सायंकाले एकः सनसनीजनकः घटनाक्रमः प्रकाशम् आगतः। सरस्वती-पैराडाइज- इण्टरनेशनल-विद्यालयस्य (निजीविद्यालयस्य) सञ्चालिका मनीषामित्तल नाम्नी महिला विद्यालयपरिसरस्य प्रवेशद्वारस्य समीपे गोलीप्रहारेण हता। घटनानन्तरं सम्पूर्णक्षेत्रे कोलाहलः जातः। मुखावरणधारिभिः आक्रमणकारिभिः मनीषायाः उपरि गोलिकाप्रहारः कृतः, ततः ते घटनास्थलात् पलायिताः। मनीषा मित्तल मूलतः हरियाणाराज्यस्य निवासिनी आसीत् तथा संजौलीस्थितस्य विद्यालयस्य सञ्चालनं कुर्वती आसीत्। घटनानन्तरं पुलिस-विभागस्य दलम् अपि घटनास्थलं प्राप्य अन्वेषणकार्यं प्रारब्धवान्। तथापि अद्यावधि आक्रमणकारिणां परिचयः न प्राप्तः।

## विद्यालयस्य प्रवेशद्वारसमीपे अभवत् घटना

प्राप्तसूचनानुसारं शनिवासरे सायं प्रायः सार्धषड्समये मनीषा मित्तल समीपस्थात् विक्रयकेन्द्रात् आवश्यकसामग्रीं गृहीत्वा पुनः विद्यालयं प्रत्यागच्छति स्म। तस्मिन् समये विद्यालयस्य प्रथमप्रवेशद्वारस्य समीपे आक्रमणकारिभिः तस्याः उपरि गोलिकाप्रहारः कृतः। गोलीप्रहारेण आहतायाः मनीषायाः घटनास्थले एव निधनम् अभवत्। स्थानीयजनानां कथनानुसारं घटनाकाले त्रयाणां गोलिकाप्रहाराणां शब्दः श्रुतः। जनाः यावत् घटनास्थलं प्राप्नुवन्, तावता आक्रमणकारिणः तस्मात् स्थानात् पलायिताः आसन्। प्रारम्भिकसूचनासु आक्रमणकारिणः वाहनेन आगतवन्तः इति उक्तम् आसीत्, किन्तु सीसीटीवी-दृश्येषु द्वौ युनौ पदातिरूपेण धावन्तौ दृश्येते। पुलिस-विभागः अधुना सीसीटीवी-दृश्यसामग्रीसहितम् अन्येषां प्रमाणानां परीक्षणं करोति। पुलिस-सूत्राणां मते सीसीटीवी-दृश्येषु ज्ञातं यत् महिला यदा विद्यालयस्य समीपम् आगच्छत्, तदैव एकेन मुखावरणधारिणा प्रथमं तस्याः शिरसि गोली प्रक्षिप्ता, येन सा तत्क्षणमेव भूमौ पतिता। ततः दुष्कर्मिणः अग्रभागं प्रति धावितवन्तः, किन्तु पुनरागत्य अत्यन्तसमीपतः अन्ये द्वे गोलिके अपि प्रक्षिप्य पलायितवन्तः।

## मनीषायाः पुरातनं चलचित्रं प्रसृतम्

मनीषा-मित्तलस्य एकः पुरातनः दृश्यश्रव्य-लेखः (वीडियो) अपि प्रकाशम् आगतः, यस्मिन् सा स्वजीवनस्य संकटस्य विषये उक्तवती आसीत्। तस्मिन् दृश्यलेखे मनीषा स्वभ्रातरं तस्य सहयोगिनं गोविन्दं च प्रति स्वजीवनस्य संकटम् अस्ति इति पक्षं कृतवती। दृश्यलेखे सा वदति- “अहं पुलिसविभागं दूरभाषेण सम्पर्कं कृतवती, किन्तु पुलिस-विभागः वदति यत् यदा कलहः वा संघर्षः भविष्यति तदा वयम् आगमिष्यामः। किं ते तदा मम साहाय्यं करिष्यन्ति यदा मां हनिष्यन्ति? अहम् अत्र स्वपुत्र्या सह एकाकिनी वसामि। अहं एसपी-महोदयम् अपि दूरभाषेण सम्पर्कं कृतवती।”

## सुरक्षाव्यवस्थां प्रति प्रश्नाः उत्थापिताः-

घटनास्थले उपस्थितः स्थानीयनिवासी अमित कोहली अवदत् यत् मनीषा-मित्तल तेन सह वार्तालापस्य समये स्वजीवनस्य संकटस्य विषये उक्तवती आसीत्। तेन उक्तं यत् मनीषायाः स्वजनैः सह सम्पत्तिविवादः प्रचलति स्म। अमित कोहली अवदत् यत् मनीषा बहुवारं सुरक्षायाः आग्रहं कर्तुं एसपी-कार्यालयमपि गता आसीत्। तेन उक्तं यत् यथा दिवसा एव एषा हत्या अभवत्, तेन स्वपुत्र्याः सुरक्षाविषये अपि चिन्ता वर्धिता अस्ति। तेन पुलिसविभागात् बालिकायाः सुरक्षा सुनिश्चितीकरणस्य, अपराधिनां शीघ्रग्रहणस्य आग्रहः कृतः।
स्थानीयनिवासी अतुल शर्मा अपि अवदत् यत् एवं प्रकारेण दिवसा एव महिलायाः हत्या अत्यन्तं गम्भीरः विषयः अस्ति। तेन पुलिस-विभागात् निष्पक्षान्वेषणस्य, अपराधिनां शीघ्रग्रहणस्य आग्रहः कृतः। तेन एषः प्रश्नोऽपि उत्थापितः यत् यदि महिला पूर्वमेव संकटस्य विषये सूचितवती आसीत्, तर्हि तस्यै सुरक्षा किमर्थं न प्रदत्ता?

## पुत्र्याः सुरक्षायाः याचना अभवत्-

स्थानीयपार्षदः कुलदीप-ठाकुरः अवदत्- “अस्य प्रकरणस्य अन्वेषणं पुलिस-विभागेन क्रियते। मनीषा मित्तल स्वकनिष्ठया पुत्र्या सह अत्र निवसति स्म, या अधुना सर्वथा एकाकिनी जाता अस्ति। अस्माकं प्रथमयाचना तस्याः बालिकायाः सुदृढसुरक्षाव्यवस्थां प्रति अस्ति। अस्याः घटनायाः कारणात् स्थानीयनिवासिषु भयस्य चिन्तायाश्च वातावरणं निर्मितम् अस्ति। वयं पुलिस-प्रशासनात् प्रार्थयामः यत् तत्क्षणं कार्यविधिं कृत्वा आक्रमणकारिणः कारागारं प्रेषयन्तु।”

# जीवनरक्षायाः प्रार्थनां कृत्वापि हत्या, सर्वकारः किं करोति?- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः उक्तवान् यत् प्रदेशे विधि-व्यवस्था पूर्णतया ध्वस्ता जाता अस्ति। प्रदेशस्य राजधानी-शिमलायां ह्यः सायंकाले एव एका महिला गोलीप्रहारेण मारिता। आश्चर्यस्य विषयः अयं यत् या महिला हता, सा पुनः पुनः स्वहत्याशङ्कां प्रकट्य पुलिस-प्रशासनात् स्वजीवनरक्षणस्य याचनां कुर्वती आसीत्। पुनः पुनः याचनायाः अनन्तरमपि तस्याः जीवनं रक्षितुं न शक्यते। एतादृश्यः हृदयविदारकाः घटनाः हिमाचले पूर्वं न श्रुताः, किन्तु अधुना ताः प्रतिदिनं दृश्यन्ते। हिमाचलप्रदेशे एतादृशानां घटनानां स्थानं न भवितव्यम्। प्रदेशे विधिराज्यं भवितव्यम्, किन्तु अत्र अपराधिनः प्रतिदिनम् उत्पातं कुर्वन्ति, पुलिस-विभागश्च मूकदर्शकवत् पश्यति।
तेन उक्तं यत् एका महिला स्वहत्यायाः आशङ्कां प्रकट्य पुनः पुनः जीवनरक्षणस्य प्रार्थनां कृत्वापि यदि पुलिस-विभागः तस्याः रक्षणं कर्तुं न शक्नोति, तर्हि एषा पुलिस-प्रशासन-सर्वकारस्य महती विफलता अस्ति। हत्याकाण्डे संलग्नेषु सर्वेषु अपराधिषु कठोरात् कठोरतरकार्यविधिः भवेत्, येन तस्य सन्देशः दूरपर्यन्तं गच्छेत्। अस्मिन् प्रकरणे प्रमादं कृतवन्तः सर्वे उत्तरदायिनः अधिकारिणः अपि कठोरकार्यविधेः भागिनः भवेयुः। जयरामठाकुरः अवदत् यत् पुलिस-विभागस्य कार्यं विधिव्यवस्थायाः सुदृढीकरणं, अपराधिषु नियन्त्रणम्, अराजकतत्त्वेषु च कार्यविधिकरणं भवति। किन्तु हिमाचलस्य पुलिसविभागः सर्वकारस्य निर्देशानुसारम् अन्येषु कार्येष्वेव व्यग्रः अस्ति। सः सर्वकारविरुद्धं स्वरं उत्थापयतां तथा मुख्यमन्त्रिणः विफलताः प्रकाशयतां जनानां विरुद्धं कार्यविधिं करोति। भारतीयजनतापक्षस्य समर्थनात् विजितान् नवनिर्वाचितान् जनप्रतिनिधीन् पीडयितुं तेषु प्रभावं स्थापयितुं च व्यग्रः अस्ति। सत्तासमर्थितानाम् अराजकतत्त्वानां संरक्षणे संलग्नः अस्ति। विपक्षनेतृणां स्थानसूचनां ज्ञातुं व्यग्रः अस्ति। भारतीयजनतापक्षस्य नेतृणां दूरभाषसंवादानां निरीक्षणे संलग्नः अस्ति। सर्वकारविरुद्धं स्वरम् उत्थापयतां जनान् मिथ्याप्रकरणेषु सम्बध्य कारागारं प्रेषयितुं व्यस्तः अस्ति। पत्रकारेषु मिथ्याप्रकरणानि पञ्जीकर्तुं व्यस्तः अस्ति। वयं पूर्वमेव सावधानं कृतवन्तः यत् सर्वकारः यथा विधि- व्यवस्थारक्षणाय नियुक्तं पुलिसविभागं स्वकीयस्य “उपकरणस्य” रूपेण उपयुज्य विपक्षं पीडयति, तस्य दुष्परिणामाः अवश्यमेव प्रकटिष्यन्ते। प्रतिपक्षनेता अवदत् यत् गतदिने सम्पूर्णप्रदेशस्य विधि-व्यवस्थायाः विषये गम्भीराः प्रश्नाः उत्थापिताः सन्ति। मादकद्रव्यव्यसनं सम्पूर्णप्रदेशे उत्पातं करोति। प्रत्यक्षरूपेण मादकद्रव्य- अतिसेवनात् जनानां मृत्यवः भवन्ति। प्रदेशे कुत्रापि दिवसा एव गोलीप्रहाराः भवन्ति। कुत्रचित् विद्यालयं गच्छन्त्याः कन्यायाः कण्ठच्छेदनं क्रियते, कुत्रचित् कार्यरतायाः महिलायाः विद्यालयपरिसरे एव निर्ममतया हत्या क्रियते। कार्यविधेः नाम्ना पुलिसविभागः केवलम् औपचारिकतां पूरयन् दृश्यते। हिमाचलप्रदेशः देवभूमिः अस्ति, किन्तु अत्र घटमानाभिः आपराधिकघटनाभिः प्रदेशस्य छविरपि क्षतिग्रस्ता जाता। एतादृश्यः घटनाः तस्मात् वर्धन्ते यतः पुलिस- प्रशासनस्य ध्यानं विधिव्यवस्थायाः सुदृढीकरणे नास्ति, अपि तु स्वकीयान् राजनीतिक-प्रमुखान् तुष्टयितुम् अस्ति। तेन उक्तं यत् हिमाचलप्रदेशस्य परिचयः शान्तिप्रियराज्यरूपेण अस्ति। पर्यटनं अत्र अर्थव्यवस्थायाः प्रमुखाधारः अस्ति। यदि एवं प्रकारेण दिवसे एव गोलीप्रहाराः भविष्यन्ति तथा विधिव्यवस्था रसातलं गमिष्यति, तर्हि प्रदेशः महत्मूल्यं दास्यति। अतः मुख्यमन्त्रिणं प्रति मम आग्रहः अस्ति यत् प्रदेशस्य विधि-व्यवस्थां सुदृढां कर्तुं प्रभाविकाणि पदानि स्वीकुर्यात् तथा व्यवस्थायां विद्यमानाः दोषाः शीघ्रं निराकुर्यात्।

# धौलाधारात् गिरिपारपर्यन्तं गर्वस्य घोषः प्रतिध्वनितः, हिमाचलप्रदेशस्य दश युनः सेना- वायुसेनयोः अधिकारिणः अभवन्



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**
भारतीयसैन्य-अकादमी (आईएमए) देहरादूनतः प्रशिक्षणं सम्पन्नं कृत्वा। हिमाचलप्रदेशस्य अष्टौ युनः सेनायाम् अधिकारीणः भूत्वा प्रदेशस्य नाम गौरवान्वितवन्तः। पासिंग-आउट-परेड इत्यवसरे ताराङ्कितवेशधारिणः एते वीराः राष्ट्रसेवायाः शपथं गृहीतवन्तः। तेषाम् अस्य उपलब्धेः कारणात् परिवारेषु सम्पूर्णप्रदेशे च गर्वस्य वातावरणं वर्तते।

बैजनाथ- उपमण्डलस्य बण्डीयां- खोपा- ग्रामपञ्चायतनिवासी नितिन ठाकुरः, हमीरपुरस्य नादौन- क्षेत्रनिवासिनी देवान्शी-शर्मा वायुसेनायां फ्लाइंग- ऑफिसरपदे नियुक्तौ अभवताम्। नादौन- उपमण्डलस्य समहूं ग्रामनिवासिन्याः देवान्शी शर्मा रक्षाक्षेत्रे प्रवेशस्य प्रेरणा तस्याः मातामहात् कर्नल रोशनलालशर्मणः प्राप्ता। देवान्श्याः पिता अभियन्ता राजेशशर्मा, माता नीनाशर्मा च अवदताम् यत् तेषां पुत्री बाल्यकालादेव राष्ट्रसेवायाः स्वप्नं पश्यन्ती आसीत्।

## बैजनाथस्य अनिमेषः, नितिनश्च सैन्याधिकारी अभवताम्

नगरपरिषदः गणेशबाजार-निवासी अनिमेषकुमारः सेनायां कमीशनं प्राप्तवान्। अमिता-बलदेवयोः पुत्रस्य अनिमेषस्य प्रारम्भिकशिक्षा बैजनाथस्य माउण्ट- कार्मल- विद्यालये अभवत्। अनिमेषस्य पितामहः यू. आर. चीमा अपि सेनायां तथा प्रदेशप्रशासनिकसेवायाम् उपमण्डलाधिकारी (एसडीएम) पदात् सेवानिवृत्तः अस्ति। तस्य पितृव्यः डॉ. राजकुमारः बैजनाथ- चिकित्सालये चिकित्सकरूपेण सेवारतः अस्ति।

उपमण्डलस्य बण्डीयां-खोपा-ग्रामपञ्चायतनिवासी नितिन ठाकुरः वायुसेनायां फ्लाइंग ऑफिसर (फाइटर पायलट) रूपेण कमीशनं प्राप्तवान्। नितिनस्य अस्य उपलब्धेः कारणात् सम्पूर्णक्षेत्रे गर्वस्य वातावरणम् अस्ति। सुनील ठाकुरस्य (टीनू) तथा अनामिका देव्याः कनिष्ठः पुत्रः नितिनः प्रारम्भिकशिक्षां बैजनाथस्य निजी- विद्यालये प्राप्तवान्। नितिनस्य पितामहः चैनसिंहः सेनायां सूबेदारपदात् सेवानिवृत्तः आसीत्, यदा तस्य मातामहः कृष्णचन्द्र राणा अपि सेनायां कैप्टनरूपेण सेवां कृतवान्।

## सिरमौरस्य विवेकः, तेजेन्द्रश्च राष्ट्रसेवायाः संकल्पं गृहीतवन्तौ

गिरिपारक्षेत्रस्य विवेक चौहानः, लेफ्टिनेंट तेजेन्द्र ठाकुरः सेनायाम् अधिकारिणौ अभवताम्। तौ देहरादूनस्थितायाम् आईएमए संस्थायां आयोजितायां पीओपी-परेड इत्यत्र राष्ट्रसेवायाः शपथं गृहीतवन्तौ। लेफ्टिनेंट विवेक चौहानः कर्नल जे. एस. चौहानस्य तथा मोनिका-चौहानस्य पुत्रः, कुजनाल ग्रामनिवासी च अस्ति। तस्य सफलता अत्यन्तं विशेषा वर्तते। वर्षे 2002 तमे तस्य पिता कर्नल जे. एस. चौहानः स्वयम् आईएमए- इत्यस्य ऐतिहासिक- ड्रिल-स्क्वायरतः भारतीयसेनायाम् अधिकारी अभवत्।

भेड़ीवाली- सालवाला- ग्रामस्य लेफ्टिनेंट तेजेन्द्र ठाकुरः अतर-ठुंडू-पुत्रः अस्ति। तस्य उपलब्ध्याः उपलक्ष्ये भव्यस्वागतं कृतम्। अस्मिन् अवसरे लेफ्टिनेंट तेजेन्द्र-ठाकुरस्य अतिरिक्तं तस्य पितृव्यः सतपाल ठुंडू, भूतपूर्व- सैनिक- संगठनस्य पांवटासाहिब- शिलाईक्षेत्रयोः अध्यक्षः करनैल सिंहः अपि उपस्थितः आसीत्।

## ऊनाजनपदस्य अर्पित जसवालः स्वप्नं साकारं कृतवान्

नकड़ोह- ग्रामनिवासी अर्पित-जसवालः भारतीयसेनायां लेफ्टिनेंट भूत्वा स्वकीयं स्वप्नं साकारं कृतवान्। अर्पितस्य पिता आबकारी- विभागे कार्यरतः अस्ति, माता सुषमा-देवी गृहिणी अस्ति। अर्पितस्य नियुक्तिः बॉम्बे- इञ्जीनियर्स इत्यत्र अभवत्। अर्पितः अस्य श्रेयः मातापितृभ्यां, पितामह- पितामहीभ्यां, मातामह- मातामहीभ्यां, अन्येभ्यः परिजनेभ्यः अददात्।

## धर्मशालायाः गौरव ठाकुरः सेनायां लेफ्टिनेंट अभवत्

धर्मशालायाः श्यामनगर-निवासी गौरव-ठाकुरः सेनायाम् अधिकारी अभवत्। गौरवः सैन्य- परम्परायुक्त- परिवारस्य सदस्यः अस्ति। तस्य पिता भारतीयसेनायाः सूबेदारपदात् सेवानिवृत्तः अस्ति, यदा तस्य पितामहः अपि सेनायां हवलदारपदे आसीत्। तस्य माता गृहिणी अस्ति, ज्येष्ठा भगिनी धर्मशालास्थिते सीएमओ- कार्यालये कार्यरता अस्ति।

## सृजन गोस्वामी परिजनान् शिक्षकाश्च श्रेयसा सम्मानितवान्

जोगिन्द्रनगर- निवासी सृजन-गोस्वामी भारतीयसेनायां लेफ्टिनेंट अभवत्। अस्य पूर्वं सः राष्ट्रिय- रक्षा- अकादम्यां (एनडीए) प्रशिक्षणं प्राप्तवान्, पश्चात् आईएमए देहरादूने प्रशिक्षणं सम्पन्नं कृत्वा भारतीयसेनायां लेफ्टिनेंट-पदं प्राप्तवान्। सः स्वसफलतायाः श्रेयः स्वपरिवाराय शिक्षकेभ्यश्च अददत्।

## पिता कैप्टनः आसीत्, पुत्रः लेफ्टिनेंट अभवत्-

रैंखा-क्षेत्रस्य मत्याल-ग्रामनिवासी साहिल-कुमारः सेनायां लेफ्टिनेंट अभवत्। तस्य परिवारस्य तृतीया सन्ततिः सेनायां प्रविष्टा अस्ति। साहिलस्य पिता सेवानिवृत्त कैप्टन सुरेशकुमारः अवदत् यत् तस्य भ्रातृव्यः सूबेदारः सुभाषचन्द्रः अपि भारतीयसेनायां सेवां करोति। साहिलस्य माता नीलमदेवी तथा पितामही सिमरोदेवी अवदताम् यत् पुत्रं सैन्यवेषे दृष्ट्वा अत्यन्तं हर्षः जातः।

## तृतीया सन्ततिः राष्ट्रसेवायाः परम्परां वहति-

ग्रामपञ्चायत् पधियाण-निवासी तन्मय-सांख्यानः सेनायाम् अधिकारी अभवत्। तन्मय-सांख्यानः वायुसेनायाः मानद-फ्लाइंग-ऑफिसर-पदात् सेवानिवृत्तस्य सुरेन्द्रकुमार-सांख्यानस्य तथा रेणु सांख्यानायाः पुत्रः अस्ति। तस्य पितामहः मानद कैप्टन प्रभुरामः वर्ष 1946 तः 1977 पर्यन्तं भारतीयसेनायां सेवां कृत्वा राष्ट्रसेवां कृतवान्।

## भारतीयसेनायाः परिधानं परिवर्तितम्, आङ्ग्लकालस्य चिह्नानि अपाकृतानि, सम्मर्दे (परेड) खड्गः न, अधिकारिणः 'बंडी' (अङ्गरक्षकं) धरिष्यन्ति

भारतीयसेनया स्वस्य परिधानेन (uniform) प्रसाधनेन (grooming) च सम्बन्धितेषु नियमेषु महत् परिवर्तनं कृतम् अस्ति। सेनायाः नवीननियमावल्याः 'आर्मी यूनिफॉर्म्स-२०२६' इत्यस्य अन्तर्गतं बहवः तादृशाः प्रावधानाः परिवर्तिताः अपाकृताः वा, ये दीर्घकालात् ब्रिटिश-शासनकालस्य परम्परा इति मन्यन्ते स्म। सेनायाः कथनम् अस्ति यत् एतेषां परिवर्तनानाम् उद्देश्यं भारतीयसैन्यपरम्पराणां संरक्षणं कुर्वन् वर्दी-नियमान् देशस्य परिवर्तमानस्वरूपस्य वर्तमान-आवश्यकतानां च अनुकूलं निर्माणं वर्तते।

**बंडी-वस्त्रस्य समावेशः-:** १७४ पृष्ठानां नवीननियमावल्याः अनुसारम् इदानीं सेनायाः अधिकारिणः औपचारिक-परिधानेन (formal dress) सह कण्ठबन्धिनीं (बंद गले वाली) 'बंडी' इति जॅकेट्-वस्त्रं धर्तुं शक्ष्यन्ति। इयं प्रथमा सञ्चिका अस्ति यदा सेनया पारम्परिकं भारतीयवस्त्रं औपचारिकसैन्यपरिधानस्य भागं कृतम्। यद्यपि एतदर्थं वर्णं रूपरेखां च अधिकृत्य केचन मानदण्डाः निर्धारिताः सन्ति, येन परिधानस्य (वर्दी) गरिमा सुरक्षिता भवेत्।

# Fifa world Cup- मोरक्को-ब्राजील देशयोः क्रीडाद्वन्द्वं समेन (ड्रॉ) समाप्तम्, स्कॉटलैंड-कतर देशौ विजयी-सफलौ च



**हिमसंस्कृतवार्ता।** विश्वस्य सप्तमक्रमाङ्कस्य दलेन मोरक्को-देशेन रविवासरे पादकन्दुक-विश्वस्पर्धायां (फुटबॉल वर्ल्ड कप) पञ्चवारं विजेतारं ब्राजील-देशं समपदे (ड्रॉ) रोधितम्। ब्राजील-दलं १९३४ तः स्वस्य उद्घाटन-प्रतियोगितायां (ओपनिंग मैच) न पराजितम् अस्ति। 'ग्रुप-सी' इत्यस्य द्वन्द्व-क्रीडायाम् २०२२ वर्षस्य उपांत्यविजेता (सेमीफाइनलिस्ट) मोरक्को-दलम् 'इस्माइल साइबारी' इत्यस्य गोलेन अग्रे अभवत्। तथापि, प्रख्यात-अग्रपंक्ति-क्रीडकेन (स्टार फॉरवर्ड) 'विनिसियस जूनियर' इत्यनेन कृतेन सुन्दरेण गोलेन ब्राजील-दलेन पुनरागमनं कृत्वा एकः अङ्कः प्राप्तः।
मोरक्को-दलेन आक्रामक-आरम्भः कृतः तथा च २१तमे निमेषे (minute) अग्रता प्राप्ता। 'नुसैर मजराउई' इत्यनेन ब्राजील-दलस्य मध्यपंक्ति-क्रीडकात् (मिडफील्डर) 'लुकास पाकेटा' इत्यस्मात् कन्दुकं (ball) छित्वा 'ब्राहिम डियाज' महोदयाय दत्तम्। ततः डियाज इत्यस्य उत्कृष्ट-पासेन (थ्रू बॉल) 'इस्माइल साइबारी' त्वरितं धावित्वा गोलरक्षकस्य (गोलकीपर) 'एलिसन बेकर' इत्यस्य उपरिष्टात् कन्दुकं प्रक्षिप्य गोलं कृतवान्। ब्राजील-दलेन ११ निमेषानन्तरं प्रत्युत्तरं दत्तम्। ३२तमे निमेषे 'विनिसियस जूनियर' इत्यनेन 'ब्रूनो गिमारेस' इत्यनेन सह उत्तमं तालमेलं प्रदर्शितम्। वामभागात् (बाएं फ्लैंक से) अन्तः प्रविश्य तेन दक्षिणपादेन (right foot) तीव्रः प्रहारः कृतः, यः मोरक्को-दलस्य गोलरक्षकं 'यासीन बूनू' इत्यं वञ्चयित्वा गोले प्रविष्टः। एषः विनिसियस इत्यस्य अन्तर्राष्ट्रीय-क्रीडाजीवनस्य (international career) दशमः गोलः अस्ति। ब्राजील-दलं अस्मिन् विश्वप्रतिस्पर्धायां २००२ वर्षानन्तरं प्रथमं उपाधिं (खिताब) प्राप्तुं क्रीडति, तथापि दले स्वस्य प्रमुखक्रीडकस्य 'नेमार' इत्यस्य अभावः अनुभूतः, यः जङ्घायाः (पिंडली) क्षतात् सुस्थः भवन् अस्ति तथा च अस्यां स्पर्धायां न क्रीडितवान्।

## स्कॉटलैंड देशस्य हैती देशोपरि विजयः



पादकन्दुक-विश्वस्पर्धायां अन्यस्मिन् द्वन्द्वे स्कॉटलैंड-दलेन हैती-दलं १-० इत्यनेन पराजितम्। बूस्टन-क्रीडाङ्गणे २८तमे निमेषे 'जॉन मैक्गिन' इत्यनेन गोलः कृतः। एषः एव निर्णायकः गोलः सिद्धः अभवत्। स्कॉटलैंड-दलेन ४४ वर्षानन्तरं पादकन्दुकविश्वचषके विजयेन सह आरम्भः कृतः अस्ति। स्कॉटलैंड-दलस्य 'स्कॉट मैकटॉमिने' इत्यनेन आरम्भिकेषु निमेषेषु एकः 'हेडर' (शिरसा प्रहारः) बहिः क्षिप्तः, ततः तस्य प्रहारः गोल-स्तम्भात् (पोस्ट) ताडयित्वा प्रत्यागतः। २९तमे निमेषे 'चे एडम्स' इत्यनेन 'बेन गैनन-डोक' महोदयाय पासः दत्तः। तस्य प्रहारं हैती-दलस्य रक्षकेभिः (डिफेंडर्स) रोधितम्, परन्तु कन्दुकः बॉक्स-बहिः स्थिताय 'जॉन मैक्गिन' महोदयाय प्राप्तः। मैक्गिन इत्यनेन तीव्रः प्रहारः कृतः, यः प्रतिहतः (डिफ्लेक्ट) भूत्वा गोले प्रविष्टः।
गोल-प्राप्त्यनन्तरं हैती-दलेन पुनरागमनस्य प्रयासः कृतः। 'रूबेन प्रोविडेंस' इत्यनेन सुन्दरः अवसरः निर्मितः, परन्तु स्कॉटलैंड-दलस्य गोलरक्षकेण 'एंगस गन' इत्यनेन सङ्कटः निवारितः। द्वितीयार्धे (second half) अपि मुकाबला तीव्रगत्या अभवत्, तथापि द्वाभ्याम् अपि दलाभ्यां स्पष्टाः अवसराः न प्राप्ताः। मैक्गिन महोदयाय द्वितीयं गोलं कर्तुम् अवसरः आसीत्, परन्तु तस्य प्रहारः लक्ष्यात् (target) च्युतः। क्रीडायाः अन्तिमचरणे हैती-दलेन समपदाय पूर्णः प्रयत्नः कृतः, परन्तु स्कॉटलैंड-दलेन स्वस्य अग्रता रक्षिता तथा च १-० इत्यनेन विजयः प्राप्ता।

## कतर देशेन स्विट्जरलैंड दलं समपदे (ड्रॉ) रोधितम्



सांता क्लारा। अन्तिमक्षणेषु 'बौआलेम खौखी' इत्यस्य गोलेन कतर-देशेन फुटबॉल-विश्वकप-क्रीडायां स्विट्जरलैंड-दलं १-१ इति समपदे (ड्रॉ) रोधितम्। इंजरी-समयस्य (injury time) चतुर्थे निमेषे 'हेडर' माध्यमेन कृतेन अनेन गोलेन कतर-दलं पराजयात् रक्षितम्, स्विट्जरलैंड-दलात् च विजयः छिन्नः। अतः पूर्वं ९० निमेषाणां क्रीडायां स्विट्जरलैंड-दलस्य प्राधान्यम् आसीत्, परन्तु दलं विजयं प्राप्तुं न शक्नोत्। स्विट्जरलैंड-दलाय १७तमे निमेषे अग्रता प्राप्ता। कतर-दलस्य गोलरक्षकेण 'महमुद अबुनादा' इत्यनेन 'ब्रेल एंबोलो' महोदयः बॉक्स-अन्तः बाधितः (फाउल कृतः), येन निर्णयकेन (रेफरी) दण्डशुल्कं दत्तम्। एंबोलो महोदेन अवसरः न त्यक्तः तथा च कन्दुकः गोलपोस्टस्य उपरिभागे प्रक्षिप्य दलं १-० इत्यनेन अग्रे कृतम्। क्रीडायां स्विट्जरलैंड-दलेन कन्दुके उपरि अधिकं नियन्त्रणम् धारितं तथा च बहुवारं गोल-अवसराः निर्मिताः। तथापि कतर-दलस्य रक्षापंक्त्या गोलरक्षकेन च बहवः आक्रमणाः निष्फलाः कृत्वा दलं क्रीडायां रक्षितम्।



# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। गतदिनेतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। मया एकं महत् वृत्तं ज्ञातम्। अन्तरिक्षयानसंस्थायाः सार्वजनिक- अंश-विक्रयणेन ईलोन मस्कः विश्वस्य प्रथमः लक्षकोट्यधिपतिः जातः अस्ति। सः सुविशालं धनं प्राप्तवान् अस्ति।
**काव्या-** सत्यम्, एतादृशं विशालं धनं पूर्वं केनापि न लब्धम्। परन्तु अपरं विचित्रं वृत्तं मया पठितम्। अमेरिकादेशस्य एकया अन्तर्जाल-प्रसारिकया अस्माकं प्रियाणि आम्रफलानि 'जुगुप्सितानि' इति कथितानि। तया कथितं यत् महाविपणिकायां प्रवेशनं मुम्बईनगरे इव अनुभूतम्। सा तत्रत्यान् भारतीय-क्रेतॄन् उपहसितवती अस्ति।
**नन्दिनी-** अतीव मूर्खतापूर्णं वचनम् एतत्। तया भारतीय- खाद्य-संस्कृतिः न ज्ञाता। इदानीम् एतां विस्मयकारिणीं घटनां शृणु। हॉन्गकॉन्गदेशे एकया त्रयोदशवर्षीयया कन्यकया पित्रोः सुरक्षित- पेटिकायाः ३,८०,००० हॉन्गकॉन्ग-मुद्राः चोरिताः। एतत् सर्वं धनं तया अन्तर्जालमाध्यमे उपहार- प्रदानाय उपयुक्तम्। सा अन्तर्जाल-मोहे पतितवती अस्ति।
**काव्या-** एषः खलु महत्याः चिन्तायाः विषयः। आधुनिक- दूरभाषैः बालकाः स्वमार्गं त्यक्तवन्तः सन्ति। दूरभाषस्य विषये एव अपरं शोधकार्यं मया दृष्टम्। अमेरिकादेशे एकेन नवीन-अध्ययनेन एतत् स्पष्टीकृतम् यत् ऐफोन-दूरभाषस्य प्रसारः तत्रत्यायाः प्रजनन-क्षमतायाः ह्रासस्य अर्धभागस्य कारणं भवितुम् अर्हति। शोधकर्तारः तत्रत्यानां जनानां व्यवहार-परिवर्तनं दर्शितवन्तः सन्ति।
**नन्दिनी-** अविश्वसनीयम् एतत्! तन्त्रज्ञानेन अस्माकं समाजः अकल्पनीयरूपेण प्रभावितः। आवां विभिन्नाः वार्ताः उपस्थापितवत्यौ स्वः। अनेन गतदिनेतनः कार्यक्रमः समाप्तः। पुनर्मेलिष्यामः!

# "विनोदकणिका"

## "भार्यायाः गणितः"

किमपि कार्यस्य कृते द्विशतम् अधिक पञ्चाशत् (२५०) रूप्यकाणि न्यूनानि जातानि तदा अहं भार्यां याचितः। सा दत्तवती। पुनश्च एकवारं २५० रूप्यकाणि एव न्यूनानि जातानि, तदा अहं पुनरपि भार्यायाः ऋणं गृहीतवान्। सा अपि शीघ्रं दत्तवती। अहं आश्चर्यचकितः अभवम्। पूर्वं सा कदापि निःशब्दं धनं न दत्तवती।
कानिचित् दिनानन्तरं अहं ATM तः धनं निष्कासितम् तदा भार्या स्व धनस्य प्रत्यार्पणं स्मारितम्। अहं २५०+२५०= ५०० रूप्यकाणि तस्यै प्रत्यार्पितमं तदा सा उक्तवती- २५०+२५०= ४१०० भवति। कथम्? अहं भ्रमितः। मम श्रवणे किमपि दोषः स्यात् इति मत्वा अहं पुनरपि पृष्टः, एतत् कथम्? सा स्वहस्ते लिखित्वा दर्शितवती-
२ ५ ० + २ ५ ०=४ १ ० ० एतादृशी। अहं दिङ्मूढ भूत्वा पश्यन् आसम्।

डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्